क्षेमम् श्रीः कल्याणपुरी

शुक्लधनुः शुक्लद्वितीया

30.12.89

डा. केशवचन्द्र दाश महोदयानां सन्निधौ सप्रश्रया विज्ञप्तिः । भवतां सादरं प्रेषितं पत्रं, LP-3 /62/89 इति संख्यातं स्वीकृतम् । कार्यान्तरेषु व्यापृतत्वात् इदानीमेव लेखनमेकं प्रेषयामि । अद्यैव भवद्भिर्निर्दिष्टावधिकालसमाप्तिः।

'लोकप्रज्ञा' अन्वर्थनामा भवेदित्याशासे । अवसरान्तरे गहनविषयाध्ययनसंशोधनरूपलेखनान्तरं प्रेषयितुं यतिष्ये। इदानीं ममापि सत्कार्ये भवन्निर्दिष्टे भागलाभाय परम् इयदुद्युक्तम् ।

एवमेव इतः परमपि संस्कृतज्ञानां सन्तोषास्पदभूतविषयविशेषान् मुहुर्मुहुः ममापि वेदयित्वा अनुगृह्णन्तु तत्र भवन्तः इति प्रार्थयिता,

भवदीयः रामानुजाचार्यः वेदवारिधिः

सानुबन्धं लेखनम् अनेन आयोजितम्

- शम् -

# संख्यावदुदयविचारः

वेदवारिधिः रामानुजाचार्यः

कल्याणपुरी (Bangalore) 30.12.89

'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' इति सुभाषितं सुप्रसिद्धमेव । धीमतां संख्यावन्तः इति नाम च 'विद्वान्विपश्चिद्दोषज्ञः .... संख्यावान् पण्डितः कविः' इति कोशात् ज्ञायते । अत्र संख्याशब्दस्य ज्ञानपदत्वं विवक्षितम् । एवमेव आधुनिकवैज्ञानिकक्षेत्रे मस्तिष्कयन्त्रं गणकयन्त्रम् इति वा निर्दिश्यमानस्य यन्त्रविशेषस्यापि संख्याभिरेव कार्यकरत्वात् संख्यावच्छब्दाभिधेयत्वं सङ्गतं स्यादिति भाति । उभयोरपि मेलने (संख्यावतां पण्डितानां संख्यावता गणकयन्त्रेण सह संयोगे) विशिष्टः 'मेधाविकासः' आविःस्यादिति तर्कये । अतः एतद्विषये अधुनातनीं स्थितिं किञ्चित् पर्यालोचयामोऽत्र लेखने, येन 'लोकप्रज्ञा'विवृद्धिः आशास्येत ॥

सनातनस्य वैदिकधर्मस्य अनादित्वं, सार्वकालिकत्वं, विद्या (परा अपरा च), कला, साहित्यादि बहुविधोपाधिभिः आनन्त्यं, तत्रापि 'एकयापि कलया विशुद्धया योऽपि कोऽपि भजते गिरीशताम्' इत्युक्तप्रकारेण एकैकस्याप्यस्य प्रभेदस्य सर्वाभीष्टदायकत्वम् इत्याद्यनेकविशेषाः प्रेक्षावतां सुविदितमेव । अस्य धर्मस्य धृतिसाधनत्वाल्लोकानां ज्ञेयत्वम् अनुष्ठेयत्वं च सिध्यतः । धर्मस्य देश-काल-समय-सिद्धान्त-आचार-कुल-चरणादि-बहुविधैः हेतुभिः वैविध्यदर्शनात् सुभाषितमेव 'धर्मस्य तत्त्वं निहितं गुहायां', 'सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः' इति ॥

अतीन्द्रियत्वात् धर्मस्य, तद्विषयकं ज्ञानम् आस्तिकैः आगमादिभिरेव प्रमाणैः अवगम्यत इति तत्र विश्वासशालिनामेव कुतूहलं दृश्यते । यद्यप्येतदेवम्, अथापि ज्ञानसामान्यस्य, तद्विषयकविचारस्य च सर्वमनुष्यसाध्यत्वात् अधिकृतत्वाच्च अर्थित्व-सामर्थ्यभाग्भिः सर्वैरपि नरैः साधारण्येनैव तत्र प्रवृत्तिरनिवारिता दरीदृश्यते । अत्र धर्मभेदे सत्यपि प्राच्यप्रतीच्योदीच्यदाक्षिणात्यभेदमन्तरा सर्वदेशेष्वपि अनादेः कालात् प्रवर्तमानः विचारः बहुभिः कृतिभिः बहुत्र बहुधा आविष्कृतः वर्तत इति विदुषां तटस्थानां अनभिनिविष्टचेतसां अमत्सराणां 'पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् । सन्तः परीक्ष्यान्यतरद् भजन्ते ..' इत्युक्तक्रमेण गुणग्रहणे प्रवृत्तिः उपपद्यते । 'सर्वतः सारम् आदद्यात्' इति च अभियुक्ताः ॥

अस्याः पीठिकायाः लेखने कारणं एवमस्ति - अनेकजन्म(प्रवाह)सञ्चितसंस्कारोद्बुद्धमनःप्रवृत्त्यधीनत्वात् ज्ञानलब्धेः,

बहुक्लेशसाध्यगुरुकुलवासमुखेनाध्येयानेकशास्त्रगतत्वात् च सम्यग्ज्ञानस्य, ईदृशप्रयत्नसाधितसकलशास्त्रज्ञान, तदनुष्ठान, अध्यापनादिनिरतैः विद्वद्भिः स्वमते यथा अभिमानः, विश्वासश्च अवश्यम् आदर्तव्यः, एवम् अन्यतः मतान्तरादि श्रवण, विचार, युक्तौ स्वीकरणे च आदरः प्रदर्श्येत । एवमेव किल शास्त्रप्रवर्तकेष्वपि भावभेदवर्णनेऽपि परस्परम् आदरः, पूजनं च दृश्यते । अतः सनातनधर्मशास्त्र अध्येतॄणाम्, अध्यापकानां च सविधे सप्रश्रयं एतद्विज्ञाप्यते यत् सारग्राहिभिः यतःकुतश्चिदपि प्रभवस्य उन्नतस्य विचाररय सामोदं स्वीकर्तृभिः भाव्यमिति । एतेन सर्वेषां महान् लाभः, ज्ञानविस्तारश्च सिध्येदिति ॥

आधुनिकैः, स्वस्वलक्षित ज्ञान, ज्ञेय विशेषमात्रस्य विज्ञानत्वं, तद्वतां वैज्ञानिकत्वं, संस्कृतादिप्राचीनभाषया प्रतिपादितानां विषयाणां तत्त्वतः पारम्येऽपि तन्महत्त्वमपनोद्य तद्गर्हणादिना स्वस्य उत्कर्षं च जानद्भिः अनेकैः बुधाभासैः प्रायेण आंग्लभाषया पाश्चात्यानुकारेण तदनुमोदितानामेवार्थानाम् अर्थ्यत्वम्, आदर्तत्यत्वं च बहुधा आमोद्यते इति स्फुटमेव तत्र भवतां गीर्वाणवाणीश्रद्धावताम् । अत्र पूर्वोक्तक्रमेण पाश्चात्यप्रभवमपि यत्किञ्चित् विषयगौरवादिहेतुभिः ग्राह्यं यदि स्यात्तर्हि तत्स्वीकारः पण्डितकृत्यमेवेति एतादृशविषयेष्वन्यतम एव मस्तिष्कयन्त्रं, येन ज्ञानविषयकसंशोधन-अनुसन्धान-अध्ययनादीनां बहुधा साह्यं सम्पाद्येतेति वस्तुस्थित्यनुसारेण तद्विषये शास्त्रज्ञानां दृष्टिः पात्यताम् इति निवेदये ॥

पाश्चात्यदेशेष्वपि अमेरिका, जर्मनी, इंग्लण्ड् इत्यादिषु संस्कृतभाषाध्ययनम् आसक्तैः अनेकैः सश्रद्धं विधीयमानम् अस्माकं विदितमेव । तत्रापि मस्तिष्कयन्त्राज्ञाः केचन सहजभाषाविश्लेषणं यन्त्रसहायेन चिकीर्षन्तः तदर्थं संस्कृतस्य औचित्यं प्राचिख्यिपुः । इदानीमपि तस्यां दिशि प्रवर्तमानाः सन्ति । संस्कृतस्य उद्भवस्थानभूते भारतदेशे अस्मदीये शास्त्रज्ञाः प्राचीनपरम्परया अध्ययनेन बहुगूढार्थान् विशदं जानन्तः पण्डितवर्याः आधुनिकमस्तिष्कयन्त्रविषये किञ्चिदपि ज्ञानं प्रयत्नतोऽपि संपाद्य, तदुपयोगेन शास्त्राध्ययने सहायं लभेरन् इति अस्माकम् आशा वर्तते । एतदर्थं कर्तव्यांशविचारः अचिरादेव आरचयितव्यः आवश्यकश्च ॥

अत्र मस्तिष्कयन्त्रे संस्कृतम् उपयोक्तुं कीदृशाः प्रयत्नाः विहिताः, किं वा तैः फलितं, का च इदानींतनी स्थितिः इति विचारे, प्रथमतः संस्कृताक्षरमयकुञ्चिसञ्चिका (keyboard), प्रदर्शिनी (Display unit), मुद्रणी (Printer) च इदानीं लभ्यन्ते । एतेषु न केवलं लेखन-पठनादिसौलभ्यमात्रम् अस्ति, अपि तु विश्लेषणाद्युपयुक्तसाहाय्यमपि (Programming facilities) । अतः संस्कृतलिप्या मस्तिष्कयन्त्रेण व्यवहर्तुं शक्यते ॥

वाचिकैः आदेशैः अपि मस्तिष्कयन्त्रकार्यकरत्वं संशोधनदशायां परीक्ष्यमाणमस्ति । अत्रापि संस्कृतोपयोगविषये उत्सुकाः केचन सन्तीति प्रमोदस्थानमिदम् । एवं कुञ्चिसञ्चिकाद्वारेण, प्रत्यक्षवाचा वा दत्तैः आदेशविशेषैः तदनुगुणं विषयविश्लेषणम् उत्तरप्रदानं, मुद्रणं वा यन्त्रेण शक्यमस्ति । अत्र प्रायेण लिखित, मुद्रित, प्रदर्शितान्येव अधुना विषयविश्लेषणानि (Data Processing) संस्कृतभाषया कर्तुं शक्यन्ते । एवमपि अनेन साध्यः शास्त्राध्ययने सहायः भूयानेवेति नात्र सन्देहः ॥

बेंगलूरुनगरे 1985 तमे वर्षे, 1986 तमे वर्षे च (क्रिस्ताब्दे) संचालिते संस्कृतज्ञ, यन्त्रज्ञ संमेलनद्वये क्रमेण प्राचीन-आधुनिकदर्शनेषु विषयप्रत्यक्षविचारः, तथा यन्त्रे ज्ञानप्रतिरूपणम्, अनुमानं च सुदूरं विमृश्य, अन्ततः युक्त-घटक-आयोजनेन न्याय-व्याकरण-मीमांसादिप्राचीनशास्त्रोक्तानाम् अर्थानां गम्भीरम् अध्ययनं यन्त्रद्वारा स्वल्पमपि, श्रमसाध्यमपि शक्यमेव, तच्च साध्यम् आवश्यकं चेति निर्णीतमासीत् । उक्तसम्मेलने बहुसंख्यया प्राच्यशास्त्रविदुषां आधुनिकयन्त्रज्ञानां च उपस्थितिः प्रमोदावहा बभूव ॥

ततः परं तत्रतत्र पार्थक्येन कृताः प्रयत्नाश्च समग्रतया एकत्र न संमिलिताः, नापि सर्वेषां सर्वैः क्रियमाणं कार्यविशेषं ज्ञातं, ज्ञापितं वा । कारणश्चात्र ईदृशसंघटकस्य कस्यचिदभाव एवेति वक्तव्यमिति मन्ये । क्रिस्ताब्दे 1989 तमे नवदेहली नगरे 'संस्कृतं तथा मस्तिष्कयन्त्र'विषये समायोजिते राष्ट्रीयसमावेशने पुनः बहवः उभयविद्यासु कुशलाः अन्वित्य अनेकविचारानारचयन् । तदनन्तरं च बेंगलूरुनगरे एकं समावेशनं प्रवृत्तम् । एतयोः उभयोरपि संस्कृतं मस्तिष्कयन्त्रे उपयोक्तुं तद्विषये आसक्तानाम्, अन्यतरविषये कुशलानां कुतूहलिनां च पट्टिका भारतस्य

सर्वप्रान्तेष्वपि व्यापिका काचित् रचनीयेति निर्धारितम् ॥

एवम् उत्साहिनां पट्टिकां सम्पाद्य तदनन्तरं एकैकशः कश्चन विषयविशेषनिर्देशपूर्वकं अपेक्षितांशसंशोधनम्, अध्ययनं वा विधीयेत । कान्पुरनगरस्थ-भारतीयतन्त्रकलाविद्यालये (Indian Institute of Technology, Kanpur) मस्तिष्कयन्त्रविभागे अध्यापकभूताः डाक्टर विनीत चैतन्य महोदयाः, तथा तिरुपति क्षेत्रस्थ केन्द्रीय संस्कृत विद्यापीठस्य व्याकरण शास्त्रप्रवक्तारः श्री. डा. रामकृष्णमाचार्याश्च बहुपरिश्रमपूर्वकं कश्चन विशेषं साधितवन्तः, येन संस्कृतभाषाव्याकरणविश्लेषणं किञ्चिदपि आरचितं, भूयो भूयः इतरेषां संस्कृतज्ञानां सहायेन प्रवर्धेत च । पूर्वोक्तैः विद्वद्भिः प्राधान्येन भाषान्तरकरणं यन्त्रमुखेन साधितुम् उद्दिष्टम् । यथा - द्राविडभाषातः आन्ध्रभाषायाः, हिन्दीतः कर्णाटकस्य; इत्यादि । सर्वत्रापि प्रथमभाषातः संस्कृतभाषासरूपपरिवर्तनं, ततः द्वितीय (उद्दिष्ट) भाषया अनुवादः (भाषान्तरकरणं) क्रियते ॥

यन्त्रेण, भाषान्तरकरणसौलभ्यं विहाय, अन्येऽपि बहवो विषयाः साधयितुं शक्याः यदि संस्कृतं यन्त्रे उपयोक्तुं जानीमः । प्रधानतः भाषाज्ञानं कोश, व्याकरण, विवरणादि मुखेन जन्यं, तैरेव ज्ञाप्यमानं च यन्त्रोपयोगेन सुकरत्वम् आपद्येत । क्लिष्ट, गहन, बहुकाल, आयास, मेधा, स्मृति, बहुग्रन्थ परामर्शादिसाध्यं शास्त्राध्ययनं यन्त्रमुखेन क्रियमाणे सुलभं, सर्वोपकारकम् एकरूपं, क्षणेन परिवर्त्यम्, आवापोद्वापादिविश्लेषणसहं, सम्यक्, सञ्चययोग्यं, पुनःपुनः दर्शन, मुद्रण, लेखनादि सौकर्ययुक्तं च सञ्जायेत । एतदर्थं नवदेहली नगरे सञ्जात-यन्त्र-संस्कृत-विषयक-समावेशने शाब्दबोधस्य मस्तिष्कयन्त्रे प्रतिरूपणविषये कर्तव्यं किञ्चित् प्रस्तुतम् । तदनु बेंगलूर् नगरे भारतीयमस्तिष्कयन्त्रसमित्याः (Computer Society of India) वार्षिक समावेशने च मस्तिष्कयन्त्रस्य आदेशभाषार्थे संस्कृतस्य औचित्यविचारः प्रतिपादितः । तत्समये बहूनाम् आधुनिकयन्त्रज्ञानां तत्र कुतूहलं प्रदर्शितमासीत् ॥

पुनश्च वल्लभविद्यानगरे आगामि कृष्णपक्षे समेष्यमाण-समावेशन-विशेषार्थं संस्कृतसाहित्यालङ्कारशास्त्रस्य विचार, विश्लेषणादिकं च यन्त्ररूपेण अध्ययनमर्हतीति प्रतिपादयिष्यते । एतावता शास्त्रज्ञानां तत्तच्छास्त्रगत-दुरूहानेकगभीरार्थान्, अनेककालपरिश्रमसंस्कारपरामर्शमननप्रवचनादिसिद्धान् विशदतमेन यन्त्रोपयुक्तमार्गेण परिवर्त्य, तान् यन्त्रसहायेन विश्लिष्य, विमृश्य, सञ्चयेन ज्ञानप्रदीपस्य इदानीं संकोचदशामापन्नस्य पुनर्विकासं आरचयितुं साध्यमेव, तच्च कर्तव्यभूतमिति च निवेदये ॥

वैदिकधर्मानुयायिनः, शास्त्रज्ञाः चतुर्दश विद्यास्थानानि निर्दिष्टवन्तः, यथोक्तं, भारते - 'अङ्गानि वेदाः चत्वारः मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥' इति । एतेषु एकैकस्यापि सम्यगध्ययने, अध्यापने तद्गतविषयविशेषावधारणे विमर्शे च परिमितबलधीप्राणतद्विघ्नदृष्ट्या च नष्टप्रायेषु प्राचीनविद्यास्थानेषु, तत्रापि सुमहता प्रयासेन ईदृशज्ञानभास्करप्रभावतां पूजादिराहित्याच्च ज्ञानान्यल्पीभूतानि इदानीमिति वास्तविकमेव। अतः श्रद्धालूनां स्वात्मसन्तोषाय, कालविशेषे समाजप्रतिष्ठासंमानादिलाभाय च यन्त्ररूपेण शास्त्रविचारणे यत्नः दुर्वारः भवेदपि । वस्तुतोऽपि तेन सहायभूयस्ता प्रतिपादिता ॥

अस्य लेखनस्य अनुबन्धत्वेन कोष्टकद्वयं, यन्त्रोपयोगिकार्यक्रमसूची चैका निवेश्यतेऽत्र यत्सहायेन यन्त्रार्थं शास्त्रगतविषयाणां प्रतिपादनं, परिवर्तनं स्थूलरूपेण अवगम्येत । तत्रापि विशेषतः निदर्शनार्थम् अत्र द्वित्राः अंशाः विव्रियन्ते । यथा शाब्दबोधककोष्टके, समासविषये - विविधाः समासभेदाः सप्रभेदाः दर्शिताः । तेषु एकैकमादाय, (यथा प्रथमातत्पुरुषः, द्वितीयातत्पुरुषः .... इत्यादि) तस्य अनेकान् उदाहरणभूतान् प्रयोगान् विभिन्न द्रव्य, गुण, कर्मादि संयोगेन निष्पन्नान् प्रसिद्ध-साहित्य,शास्त्रग्रन्थादिभ्यः संगृह्य, तेषां प्रत्येकं विग्रहवाक्यं प्रतिपाद्य, ईदृशसमस्तपदप्रयोगे संभावितसमासविशेषाणां सामस्त्येन निरूपणम् इत्यादिरूपेण 'ज्ञानकोशः' (Data or knowledge base) संपादनीयः । यथा पुरुषोत्तमः इति पदस्य पुरुषश्चासौ उत्तमश्च - कर्मधारयः, पुरुषेषु उत्तमः - सप्तमीतत्पुरुषः, पुरुषेभ्यः उत्तमः - पञ्चमी तत्पुरुषः, पुरुषाणाम् उत्तमः - (निर्धारण)षष्ठीतत्पुरुषः इत्यादि संभाविताः । क्वचित् व्यस्त, समस्त, संहितत्वं च पदविशेषस्यैव विग्रह, सन्धिभेदेन संभाव्येत । यथा 'नाभिजातः' इत्युक्ते न+अभिजातः इति सवर्णदीर्घसन्धिः, नाभौ जातः इति सप्तमीतत्पुरुषः, तसिल् प्रत्ययरूपो वा संभवति। एनं प्रत्येकस्यापि अनुबन्धगतस्यांशस्य प्रथमं, तस्य यन्त्रे समायोजने अपेक्षितास्ति ॥

एवमेव न्यायशास्त्रे गौतमसूत्रानुरोधेन षोडशविषयाणाम् उद्देश-लक्षण-परीक्षादिकं संग्राह्यम् । अत्र शास्त्रप्रतिपाद्यविषयपरिचयार्थं सूचीरूपेण अध्याय, आह्निक, प्रकरण, सूत्रक्रमेण, षोडश (प्रमाणादि) जिज्ञास्य संग्रहः, तत्रोपयुज्यमान उद्देश, लक्षण, परीक्षाक्रम, शैल्यादीनां विमर्शः, प्रमाणादीनाम् अवान्तरभेदाः तत्तद्विचारे आयोजिताः विशेषाः न्यायभाष्य, वार्तिक, टीकागताः पुनश्च कुसुमाञ्जलि, मुक्तावली, कारिकावली तद्व्याख्यासु च विमृष्टाः अंशाः शास्त्रप्रमेयबोधजननोपयोगिनः सर्वे संकलय्य प्रदर्शयितव्याः । एवं सर्वशास्त्राणामपि प्रतिपाद्यांशव्यक्त्यै सूचिकाः अपेक्षिताः सन्ति । न्याय, मीमांसा शास्त्रयोरपि मया एवं कृताः विद्वद्भिः सह संवाद, विमर्शादिना परिष्करणीयाः । एवं परिष्कृत-तत्तच्छास्त्रविषयक-सूचीनां युक्तप्रक्रियया यन्त्रे आरोपणं पश्चात्कर्तव्यम् । अत्र यन्त्रविषयक ज्ञानं, विशेषतः ज्ञानस्य यन्त्रे प्रतिरूपणं, तस्य विश्लेषार्थम् आदेशक्रमः तदुपयोगि भाषा, परिपाट्यादिकं, तत्र विमर्श, परीक्षा, परिष्कारादि साधक, क्रमादिज्ञानं च अपेक्षितं भवति । एतदर्थं शक्तैः उत्सुकैः च, पाश्चात्यैः आंग्लादि सहजभाषया मस्तिष्कयन्त्रे व्यवहर्तुं ज्ञान, शाब्दबोधादि विश्लेषणार्थं च रचित-प्रयत्न-विशेषावगतिः साधनीया, यतः तद्दिशा तदुद्बुद्धास्मत्प्रतिभया वा संस्कृतशास्त्रगतज्ञानविशेषप्रतिरूपणाद्यर्थे प्रयतितुं शक्येत ॥

मीमांसा-वेदान्तादिशास्त्रेषु, सांख्य, योग, वैशेषिकादिदर्शनेषु च तत्तत्सिद्धान्तप्रमेयावगत्यर्थं सूत्रशैल्या निर्मिताः प्रतिपादिताश्चार्थाः यन्त्रसहायेन सञ्चेतुं, विश्लेष्टुम्, अवगन्तुम्, अवगमयितुं, परिष्कर्तुं, विम्रष्टुं च कल्पेयुरिति एतदर्थं च प्रयत्नः विधातव्यः । मया चैतदर्थं सर्वशास्त्रगतसूत्राणां यन्त्रारोपणार्हरीत्या लिखित्वा यन्त्रे तानि प्रयोक्तुम् आरब्धम् । अत्र विदुषां यन्त्रज्ञानां च साहाय्यम् अवश्यापेक्षितमिति तदवाप्तये बेंगलूर् नगरस्थ 'आदर्श-शैक्षणिक-तथा-समाज-सेवा-न्यास' नामककार्यालयद्वारा 'मेधाविकास'नाम्ना कश्चित्कार्यकारी संस्थाविशेषः उद्घाटितः गतसोमवासरे । तस्य प्रधानोद्देश्यं च संस्कृतस्य लौकिकशास्त्रीयव्यवहाराद्यर्थम् उपयुक्ततया पुनरुज्जीवनं, विशेषतः संस्कृतस्य मस्तिष्कयन्त्रोपयोगे समुचिततमत्वप्रकाशनं, तदुपयोगेन शास्त्रार्थाध्ययन-संशोधन-अध्यापनादि व्यवस्थापनं, तदर्थम् आधुनिकवैज्ञानिकक्षेत्रे शास्त्रेषु च अपेक्षितसर्वांशसंग्रह-उपन्यास-विमर्श-सभा-सद-आदि परिकल्पनम्, ईदृशविषयेषु श्रद्धावतां संघटनं, परस्परं वार्तालाप, प्रश्नोत्तर, संवादादि पत्रिका, गोष्ठी विचार, लेखन, प्रवचनादि प्रचालनं, एकैकस्यापि शास्त्रस्य, विषयाणां यन्त्रोपकरण-विद्याभ्यास-पद्धतौ ईदृशावश्यापेक्षितार्थानां समायोजनेन बाल्यात्प्रभृति बालकानां अस्मत्संस्कृति, संस्कृत, शास्त्रप्रणेतृमहर्ष्यादीनां मेधाविलास, तच्छ्रैष्ठ्यादिषु आदर, अभिमान-वर्धनम् इत्यादिकं भवति ॥

आदर्शन्यासश्रेणीकुलपतीनां आचार्यकुलीनानां स्वयं बहुभाषाविशारदानां रामस्वामी अय्यंगार् महाशयानां सौहार्दपूर्ण-आदेशानुसारेण एतादृश'मेधाविकास'जनककार्यसंघटकत्वम् अङ्गीकृतवानस्मि । अत एव एतल्लेखनद्वारा प्राच्यान् विपश्चितः सर्वान् अस्मिन् संकल्पिते सत्कार्ये निर्मलहृदयेन भागिनो भवितुम् आह्वये, अभ्यर्थये च मार्गदर्शिनां महर्षिकल्पानां महतां विदुषाम् आलम्बनं, तद्द्वारा भगवत्प्रसादं च ॥

अस्य लेखनस्य अवशिष्टभागेन ज्ञानराशेः संस्कृतवाङ्मयरूपस्य इदानीम् उपलभ्यमानस्य ब्रह्मविद्या, अपरविद्या, कलारूपेण त्रैविध्यमापन्नस्य, यथासंख्यम् उपासन, चतुर्दशविद्यास्थान, चतुष्षष्टिकलारूपप्रभेदवतः, अनुश्रव, ज्ञान, क्रियाकौशलफलकस्य, समग्रस्य साहित्यस्य यं कमपि अंशमुपजीव्य यन्त्रोपयोगिरूपेण परिवर्तनाद्यर्थम् उत्सुकानां विदुषां सहकारं सर्वथा सामोदम् अभ्यर्थ्य, तत्र स्थालीपुलाकन्यायेन कांश्चिदंशान् उल्लिखामि । सर्वेषु निम्नलिखितविषयेषु प्राचीनग्रन्थसरणिम्, आधुनिकीं च विचारसरणिं तोलनात्मकदृष्ट्या ताटस्थ्येन विमृश्य, तादृशविचार, अध्ययनाध्यापनादिकं यन्त्रमुखेन निर्वर्तयितुं प्रयतनं विदुषां लाभकरम् आवश्यकं च भवेत् ॥

ते च यथा - सनातनभौतिकविज्ञानं, सनातनभूतत्त्वविज्ञानं, सनातनवनस्पतिविज्ञानं, सनातनप्राणिविज्ञानं, रसायनशास्त्रं, प्राणिशास्त्रं, ज्योतिश्शास्त्रं, गणितशास्त्रं, सृष्टिशास्त्रं, वैद्यशास्त्रं, गानशास्त्रं, वास्तुशास्त्रं, विमानशास्त्रम्, अर्थशास्त्रं, नीतिशास्त्रं, खगोल-भूगोलशास्त्रम्, इत्याद्यनेकशाखोपहिताः विलसन्ति । एषु उपलब्धभागानां सम्यक्परामर्शेन आधुनिकवादपरीक्षया च निर्गलितार्थग्रहणाय प्रयत्येत । अस्मद्बालकैः प्रथमं कीदृशी भारतीयानां विज्ञानसरणिरित्यवगन्तव्यम् । ततः परं पठन्तु ते चाधुनिकं विज्ञानवितानम् । अयं मार्गः संसेव्यमानः तेषां महते मोदाय लाभाय च कल्पेत, विशेषतः 'कम्प्यूटर्'द्वारा अध्यापिते ॥

अलङ्कारशास्त्रविषये काव्यनाटकादिरूपेण बहुविधे कान्तासम्मिततयोपदेशयुजि पृथगेवेदृशः प्रयत्नः उद्घाटनीयः,

यस्य मर्मज्ञानां कवित्वं, नैसर्गिक सौन्दर्य, जीवन तत्त्वावगति, अनुभूति, शान्त्यादि आत्मधर्माः समुल्लसेयुः । एतद्दृष्ट्या कश्चन काव्यालङ्कारविषये स्थूलपरिचयोपयोगी अनुबन्धः अत्र निवेशितः । एष च यन्त्रोपयोगार्थापेक्षित-मातृकानिदर्शनमात्रदृष्ट्या रचित इति माऽत्र लोपदोषादिचिन्ताः क्रियेरन् ।

'मेधाविकास'नाम्ना प्रवृत्ते कार्यकलापे प्रथमतः अमरकोशस्य कयाचिद्यन्त्रोपयोगिन्या विलक्षणया शैल्या अनुक्रमेण प्रतिशब्दम्, अजाद्यन्ताक्षर, लिङ्ग, पर्यायशब्द, संस्कृत-आंग्लभाषयोः अर्थविवरण, शब्दनिष्पत्तिप्रकार, अर्थस्य रूढ, योग, योगरूढादि विभाग, प्रकरणानुगुण्येन संभावितार्थस्वीकार, अमरकोशस्य श्लोकस्याकरसूचनप्रभृति विशेषांशयोगेन संकलय्य प्रकाशनं प्रवर्तते । एतदर्थम् अपेक्षितार्थाः यन्त्रोपकरणानि, संस्कृतमयकुञ्चिसञ्चिकादिकम्, आदेशग्राहकयन्त्रजातम्, इत्यादयः सज्जीक्रियन्ते । एतत्कार्यान्ते सर्वेषां संस्कृताभिमानिनाम् अध्येतॄणां परीक्षकाणां च कृते बहु उपकुर्यादयं यन्त्रमयः 'कोशः' इत्याशास्यते ॥

अनन्तरं च 'सकलशास्त्रसूत्रकोश'नाम्ना द्वितीयः प्रयत्नः निर्वर्तयितुं संकल्पितः यत्र वेदानां, तत्षडङ्गानां, लक्षणादिग्रन्थानां, सामान्यशास्त्राणां, सवेदान्तानां सूत्रजातं यन्त्रारूढं क्रियेत । यन्त्रादेशविशेषपरिपाट्या, अमरकोशोपयोगेन च यन्त्रद्वारा शाब्दबोधजननं प्रतीक्ष्यते । एवं संस्कृतेन संस्कृतज्ञानां तज्जिज्ञासूनां च कृते महत्साहाय्यं लभ्यं स्यात् । एवमेव काव्य, नाटकाद्यध्ययनं, तत्रस्थ-अलङ्कारविशेषादिविश्लेषणं, तत्पाठनादिकं च सुकरं भवेदिति च भाति ॥

'उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः' इति न्यायेन एतावता अस्मन्मनोरथः यद्यपि प्रचालितः, तथापि तत्साधनाय आफलोदयकर्मत्वम् अभिलषन् सर्वान् विदुषः अस्मिन् महति कार्ये समनसः, यथाशक्ति, समन्वेतुं प्रार्थये । विशेषतः अस्मिन्विषये स्वाभिप्रायं, मदुक्तार्थेषु, साध्वसाधुविवेचनं, उक्तानुक्तदुरुक्तपरिशोधनम्, अपेक्षितार्थान्तरादिसूचनम् इत्यादि निर्दिश्य, मामनुगृह्णीयुः इत्याशास्य विरमामि ॥

इति विद्वद्विधेयः<br>रामानुजः वेदवारिधिः

पत्र प्रेषणाद्यर्थं विलासः

प. रामानुजार्यः, संघटकः, मेधा विकासः,
आदर्श भारतीय सांस्कृतिक संसत्,
आदर्श भवनम्, 151,15th cross,
मल्लेश्वरम्, बेंगलूरु 560055.